# Shivananda LaharI

# શ્રીશિવાનન્દલહરી

## Document Information

Text title : shivAnanda laharI

File name : shivaananda.itx

Category : laharI, shiva, shankarAchArya

Location : doc_shiva

Author : ShankarAchArya

Transliterated by : P. P. Narayanaswami swami at math.mun.ca

Proofread by : P. P. Narayanaswami, Rajesh Thyagarajan, Kavitha, Rajani Arjun Shankar

Latest update : June 16, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2023

*sanskritdocuments.org*

# શ્રીશિવાનન્દલહરી

કલાભ્યાં ચૂડાલઙ્કૃતશશિકલાભ્યાં નિજતપઃ-
    ફલાભ્યાં ભક્તેષુ પ્રકટિતફલાભ્યાં ભવતુ મે ।
શિવાભ્યામસ્તોકત્રિભુવનશિવાભ્યાં હૃદિ પુન-
    ર્ભવાભ્યામાનન્દસ્ફુરદનુભવાભ્યાં નતિરિયમ્ ॥ ૧॥

ગલન્તી શમ્ભો ત્વચ્ચરિતસરિતઃ કિલ્બિષરજો
    દલન્તી ધીકુલ્યાસરણિષુ પતન્તી વિજયતામ્ ।
દિશન્તી સંસારભ્રમણપરિતાપોપશમનં
    વસન્તી મચ્ચેતોહ્રદભુવિ શિવાનન્દલહરી ॥ ૨॥

ત્રયીવેદ્યં હૃદ્યં ત્રિપુરહરમાદ્યં ત્રિનયનં
    જટાભારોદારં ચલદુરગહારં મૃગધરમ્ ।
મહાદેવં દેવં મયિ સદયભાવં પશુપતિં
    ચિદાલમ્બં સામ્બં શિવમતિવિડમ્બં હૃદિ ભજે ॥ ૩॥

સહસ્રં વર્તન્તે જગતિ વિબુધાઃ ક્ષુદ્રફલદા
    ન મન્યે સ્વપ્ને વા તદનુસરણં તત્કૃતફલમ્ ।
હરિબ્રહ્માદીનામપિ નિકટભાજામસુલભં
    ચિરં યાચે શમ્ભો શિવ તવ પદામ્ભોજભજનમ્ ॥ ૪॥

સ્મૃતૌ શાસ્ત્રે વૈદ્યે શકુનકવિતાગાનફણિતૌ
    પુરાણે મન્ત્રે વા સ્તુતિનટનહાસ્યેષ્વચતુરઃ ।
કથં રાજ્ઞાં પ્રીતિર્ભવતિ મયિ કોઽહં પશુપતે
    પશું માં સર્વજ્ઞ પ્રથિતકૃપયા પાલય વિભો ॥ ૫॥

ઘટો વા મૃત્પિણ્ડોઽપ્યણુરપિ ચ ધૂમોઽગ્નિરચલઃ
    પટો વા તન્તુર્વા પરિહરતિ કિં ઘોરશમનમ્ ।
વૃથા કણ્ઠક્ષોભં વહસિ તરસા તર્કવચસા
    પદામ્ભોજં શમ્ભોર્ભજ પરમસૌખ્યં વ્રજ સુધીઃ ॥ ૬॥

મનસ્તે પાદાબ્જે નિવસતુ વચઃ સ્તોત્રફણિતૌ
    કરૌ ચાભ્યર્ચાયાં શ્રુતિરપિ કથાકર્ણનવિધૌ ।
તવ ધ્યાને બુદ્ધિર્નયનયુગલં મૂર્તિવિભવે
    પરગ્રન્થાન્ કૈર્વા પરમશિવ જાને પરમતઃ ॥ ૭॥

યથા બુદ્ધિઃ શુક્તૌ રજતમિતિ કાચાશ્મનિ મણિ-
    ર્જલે પૈષ્ટે ક્ષીરં ભવતિ મૃગતૃષ્ણાસુ સલિલમ્ ।
તથા દેવભ્રાન્ત્યા ભજતિ ભવદન્યં જડજનો
    મહાદેવેશં ત્વાં મનસિ ચ ન મત્વા પશુપતે ॥ ૮॥

ગભીરે કાસારે વિશતિ વિજને ઘોરવિપિને
    વિશાલે શૈલે ચ ભ્રમતિ કુસુમાર્થં જડમતિઃ ।
સમર્પ્યૈકં ચેતઃ સરસિજમુમાનાથ ભવતે
    સુખેનાવસ્થાતું જન ઇહ ન જાનાતિ કિમહો ॥ ૯॥

નરત્વં દેવત્વં નગવનમૃગત્વં મશકતા
    પશુત્વં કીટત્વં ભવતુ વિહગત્વાદિ જનનમ્ ।
સદા ત્વત્પાદાબ્જસ્મરણપરમાનન્દલહરી-
    વિહારાસક્તં ચેદ્ધૃદયમિહ કિં તેન વપુષા ॥ ૧૦॥

વટુર્વા ગેહી વા યતિરપિ જટી વા તદિતરો
    નરો વા યઃ કશ્ચિદ્ભવતુ ભવ કિં તેન ભવતિ ।
યદીયં હૃત્પદ્મં યદિ ભવદધીનં પશુપતે
    તદીયસ્ત્વં શમ્ભો ભવસિ ભવભારં ચ વહસિ ॥ ૧૧॥

ગુહાયાં ગેહે વા બહિરપિ વને વાઽદ્રિશિખરે
    જલે વા વહ્નૌ વા વસતુ વસતેઃ કિં વદ ફલમ્ ।
સદા યસ્યૈવાન્તઃકરણમપિ શમ્ભો તવ પદે
    સ્થિતં ચેદ્યોગોઽસૌ સ ચ પરમયોગી સ ચ સુખી ॥ ૧૨॥

અસારે સંસારે નિજભજનદૂરે જડધિયા
    ભ્રમન્તં મામન્ધં પરમકૃપયા પાતુમુચિતમ્ ।
મદન્યઃ કો દીનસ્તવ કૃપણરક્ષાતિનિપુણ-
    સ્ત્વદન્યઃ કો વા મે ત્રિજગતિ શરણ્યઃ પશુપતે ॥ ૧૩॥

પ્રભુસ્ત્વં દીનાનાં ખલુ પરમબન્ધુઃ પશુપતે

પ્રમુખ્યોઽહં તેષામપિ કિમુત બન્ધુત્વમનયોઃ ।
ત્વયૈવ ક્ષન્તવ્યાઃ શિવ મદપરાધાશ્ચ સકલાઃ
પ્રયત્નાત્કર્તવ્યં મદવનમિયં બન્ધુસરણિઃ ॥ ૧૪॥

ઉપેક્ષા નો ચેત્ કિં ન હરસિ ભવદ્ધ્યાનવિમુખાં
દુરાશાભૂયિષ્ઠાં વિધિલિપિમશક્તો યદિ ભવાન્ ।
શિરસ્તદ્વૈધાત્રં ન ન ખલુ સુવૃત્તં પશુપતે
કથં વા નિર્યત્નં કરનખમુખેનૈવ લુલિતમ્ ॥ ૧૫॥

વિરિઞ્ચિર્દીર્ઘાયુર્ભવતુ ભવતા તત્પરશિર-
શ્ચતુષ્કં સંરક્ષ્યં સ ખલુ ભુવિ દૈન્યં લિખિતવાન્ ।
વિચારઃ કો વા માં વિશદ કૃપયા પાતિ શિવ તે
કટાક્ષવ્યાપારઃ સ્વયમપિ ચ દીનાવનપરઃ ॥ ૧૬॥

ફલાદ્વા પુણ્યાનાં મયિ કરુણયા વા ત્વયિ વિભો
પ્રસન્નેઽપિ સ્વામિન્ ભવદમલપાદાબ્જયુગલમ્ ।
કથં પશ્યેયં માં સ્થગયતિ નમસ્સમ્ભ્રમજુષાં
નિલિમ્પાનાં શ્રેણિર્નિજકનકમાણિક્યમકુટૈઃ ॥ ૧૭॥

ત્વમેકો લોકાનાં પરમફલદો દિવ્યપદવીં
વહન્તસ્ત્વન્મૂલાં પુનરપિ ભજન્તે હરિમુખાઃ ।
કિયદ્વા દાક્ષિણ્યં તવ શિવ મદાશા ચ કિયતી
કદા વા મદ્રક્ષાં વહસિ કરુણાપૂરિતદૃશા ॥ ૧૮॥

દુરાશાભૂયિષ્ઠે દુરધિપગૃહદ્વારઘટકે
દુરન્તે સંસારે દુરિતનિલયે દુઃખજનકે ।
મદાયાસં કિં ન વ્યપનયસિ કસ્યોપકૃતયે
વદેયં પ્રીતિશ્ચેત્તવ શિવ કૃતાર્થાઃ ખલુ વયમ્ ॥ ૧૯॥

સદા મોહાટવ્યાં ચરતિ યુવતીનાં કુચગિરૌ
નટત્યાશાશાખાસ્વટતિ ઝટિતિ સ્વૈરમભિતઃ ।
કપાલિન્ ભિક્ષો મે હૃદયકપિમત્યન્તચપલં
દૃઢં ભક્ત્યા બદ્ધ્વા શિવ ભવદધીનં કુરુ વિભો ॥ ૨૦॥

ધૃતિસ્તમ્ભાધારાં દૃઢગુણનિબદ્ધાં સગમનાં
વિચિત્રાં પદ્માઢ્યાં પ્રતિદિવસસન્માર્ગઘટિતામ્ ।
સ્મરારે મચ્ચેતઃસ્ફુટપટકુટીં પ્રાપ્ય વિશદાં

જય સ્વામિન્ શક્ત્યા સહ શિવ ગણૈઃ સેવિત વિભો ॥ ૨૧॥

પ્રલોભાદ્યૈરર્થાહરણપરતન્ત્રો ધનિગૃહે
પ્રવેશોદ્યુક્તઃ સન્ ભ્રમતિ બહુધા તસ્કરપતે ।
ઇમં ચેતશ્ચોરં કથમિહ સહે શઙ્કર વિભો
તવાધીનં કૃત્વા મયિ નિરપરાધે કુરુ કૃપામ્ ॥ ૨૨॥

કરોમિ ત્વત્પૂજાં સપદિ સુખદો મે ભવ વિભો
વિધિત્વં વિષ્ણુત્વં દિશસિ ખલુ તસ્યાઃ ફલમિતિ ।
પુનશ્ચ ત્વાં દ્રષ્ટું દિવિ ભુવિ વહન્ પક્ષિમૃગતા-
મદૃષ્ટ્વા તત્ખેદં કથમિહ સહે શઙ્કર વિભો ॥ ૨૩॥

કદા વા કૈલાસે કનકમણિસૌધે સહ ગણૈ-
ર્વસન્ શમ્ભોરગ્રે સ્ફુટઘટિતમૂર્ધાઞ્જલિપુટઃ ।
વિભો સામ્બ સ્વામિન્ પરમશિવ પાહીતિ નિગદન્
વિધાતૃણાં કલ્પાન્ ક્ષણમિવ વિનેષ્યામિ સુખતઃ ॥ ૨૪॥

સ્તવૈર્બ્રહ્માદીનાં જયજયવચોભિર્નિયમિનાં
ગણાનાં કેલીભિર્મદકલમહોક્ષસ્ય કકુદિ ।
સ્થિતં નીલગ્રીવં ત્રિનયનમુમાશ્લિષ્ટવપુષં
કદા ત્વાં પશ્યેયં કરધૃતમૃગં ખણ્ડપરશુમ્ ॥ ૨૫॥

કદા વા ત્વાં દૃષ્ટ્વા ગિરિશ તવ ભવ્યાઙ્ઘ્રિયુગલં
ગૃહીત્વા હસ્તાભ્યાં શિરસિ નયને વક્ષસિ વહન્ ।
સમાશ્લિષ્યાઘ્રાય સ્ફુટજલજગન્ધાન્ પરિમલા-
નલભ્યાં બ્રહ્માદ્યૈર્મુદમનુભવિષ્યામિ હૃદયે ॥ ૨૬॥

કરસ્થે હેમાદ્રૌ ગિરિશ નિકટસ્થે ધનપતૌ
ગૃહસ્થે સ્વર્ભૂજાઽમરસુરભિચિન્તામણિગણે ।
શિરસ્સ્થે શીતાંશૌ ચરણયુગલસ્થેઽખિલશુભે
કમર્થં દાસ્યેઽહં ભવતુ ભવદર્થં મમ મનઃ ॥ ૨૭॥

સારૂપ્યં તવ પૂજને શિવ મહાદેવેતિ સઙ્કીર્તને
સામીપ્યં શિવભક્તિધુર્યજનતાસાઙ્ગત્યસમ્ભાષણે ।
સાલોક્યં ચ ચરાચરાત્મકતનુધ્યાને ભવાનીપતે
સાયુજ્યં મમ સિદ્ધમત્ર ભવતિ સ્વામિન્ કૃતાર્થોઽસ્મ્યહમ્ ॥ ૨૮॥

ત્વત્પાદામ્બુજમર્ચયામિ પરમં ત્વાં ચિન્તયામ્યન્વહં
 ત્વામીશં શરણં વ્રજામિ વચસા ત્વામેવ યાચે વિભો ।
વીક્ષાં મે દિશ ચાક્ષુષીં સકરુણાં દિવ્યૈશ્ચિરં પ્રાર્થિતાં
 શમ્ભો લોકગુરો મદીયમનસઃ સૌખ્યોપદેશં કુરુ ॥ ૨૯॥

વસ્ત્રોદ્ધૂતવિધૌ સહસ્રકરતા પુષ્પાર્ચને વિષ્ણુતા
 ગન્ધે ગન્ધવહાત્મતાઽન્નપચને બર્હિર્મુખાધ્યક્ષતા ।
પાત્રે કાઞ્ચનગર્ભતાસ્તિ મયિ ચેદ્ બાલેન્દુચૂડામણે
 શુશ્રૂષાં કરવાણિ તે પશુપતે સ્વામિન્ ત્રિલોકીગુરો ॥ ૩૦॥

નાલં વા પરમોપકારકમિદં ત્વેકં પશૂનાં પતે
 પશ્યન્ કુક્ષિગતાન્ ચરાચરગણાન્ બાહ્યસ્થિતાન્ રક્ષિતુમ્ ।
સર્વામર્ત્યપલાયનૌષધમતિજ્વાલાકરં ભીકરં
 નિક્ષિપ્તં ગરલં ગલે ન ગિલિતં નોદ્ગીર્ણમેવ ત્વયા ॥ ૩૧॥

જ્વાલોગ્રઃ સકલામરાતિભયદઃ ક્ષ્વેલઃ કથં વા ત્વયા
 દૃષ્ટઃ કિં ચ કરે ધૃતઃ કરતલે કિં પક્વજમ્બૂફલમ્ ।
જિહ્વાયાં નિહિતશ્ચ સિદ્ધઘુટિકા વા કણ્ઠદેશે ભૃતઃ
 કિં તે નીલમણિર્વિભૂષણમયં શમ્ભો મહાત્મન્ વદ ॥ ૩૨॥

નાલં વા સકૃદેવ દેવ ભવતઃ સેવા નતિર્વા નુતિઃ
 પૂજા વા સ્મરણં કથાશ્રવણમપ્યાલોકનં માદૃશામ્ ।
સ્વામિન્નસ્થિરદેવતાનુસરણાયાસેન કિં લભ્યતે
 કા વા મુક્તિરિતઃ કુતો ભવતિ ચેત્ કિં પ્રાર્થનીયં તદા ॥ ૩૩॥

કિં બ્રૂમસ્તવ સાહસં પશુપતે કસ્યાસ્તિ શમ્ભો ભવ-
 દ્ધૈર્યં ચેદૃશમાત્મનઃ સ્થિતિરિયં ચાન્યૈઃ કથં લભ્યતે ।
ભ્રશ્યદ્દેવગણં ત્રસન્મુનિગણં નશ્યત્પ્રપઞ્ચં લયં
 પશ્યન્નિર્ભય એક એવ વિહરત્યાનન્દસાન્દ્રો ભવાન્ ॥ ૩૪॥

યોગક્ષેમધુરન્ધરસ્ય સકલશ્રેયઃપ્રદોદ્યોગિનો
 દૃષ્ટાદૃષ્ટમતોપદેશકૃતિનો બાહ્યાન્તરવ્યાપિનઃ ।
સર્વજ્ઞસ્ય દયાકરસ્ય ભવતઃ કિં વેદિતવ્યં મયા
 શમ્ભો ત્વં પરમાન્તરઙ્ગ ઇતિ મે ચિત્તે સ્મરામ્યન્વહમ્ ॥ ૩૫॥

ભક્તો ભક્તિગુણાવૃતે મુદમૃતાપૂર્ણે પ્રસન્ને મનઃ-
 કુમ્ભે સામ્બ તવાઙ્ઘ્રિપલ્લવયુગં સંસ્થાપ્ય સંવિત્ફલમ્ ।

સત્ત્વં મન્ત્રમુદીરયન્નિજશરીરાગારશુદ્ધિં વહન્
    પુણ્યાહં પ્રકટીકરોમિ રુચિરં કલ્યાણમાપાદયન્ ॥ ૩૬॥

આમ્નાયામ્બુધિમાદરેણ સુમનસ્સઙ્ઘાઃ સમુદ્યન્મનો-
    મન્થાનં દૃઢભક્તિરજ્જુસહિતં કૃત્વા મથિત્વા તતઃ ।
સોમં કલ્પતરું સુપર્વસુરભિં ચિન્તામણિં ધીમતાં
    નિત્યાનન્દસુધાં નિરન્તરરમાસૌભાગ્યમાતન્વતે ॥ ૩૭॥

પ્રાક્પુણ્યાચલમાર્ગદર્શિતસુધામૂર્તિઃ પ્રસન્નઃ શિવઃ
    સોમઃ સદ્ગુણસેવિતો મૃગધરઃ પૂર્ણસ્તમોમોચકઃ ।
ચેતઃ પુષ્કરલક્ષિતો ભવતિ ચેદાનન્દપાથોનિધિઃ
    પ્રાગલ્ભ્યેન વિજૃમ્ભતે સુમનસાં વૃત્તિસ્તદા જાયતે ॥ ૩૮॥

ધર્મો મે ચતુરઙ્ઘ્રિકઃ સુચરિતઃ પાપં વિનાશં ગતં
    કામક્રોધમદાદયો વિગલિતાઃ કાલાઃ સુખાવિષ્કૃતાઃ ।
જ્ઞાનાનન્દમહૌષધિઃ સુફલિતા કૈવલ્યનાથે સદા
    માન્યે માનસપુણ્ડરીકનગરે રાજાવતંસે સ્થિતે ॥ ૩૯॥

ધીયન્ત્રેણ વચોઘટેન કવિતાકુલ્યોપકુલ્યાક્રમૈ-
    રાનીતૈશ્ચ સદાશિવસ્ય ચરિતામ્ભોરાશિદિવ્યામૃતૈઃ ।
હૃત્કેદારયુતાશ્ચ ભક્તિકલમાઃ સાફલ્યમાતન્વતે
    દુર્ભિક્ષાન્મમ સેવકસ્ય ભગવન્ વિશ્વેશ ભીતિઃ કુતઃ ॥ ૪૦॥

પાપોત્પાતવિમોચનાય રુચિરૈશ્વર્યાય મૃત્યુઞ્જય
    સ્તોત્રધ્યાનનતિપ્રદક્ષિણસપર્યાલોકનાકર્ણને ।
જિહ્વાચિત્તશિરોઙ્ઘ્રિહસ્તનયનશ્રોત્રૈરહં પ્રાર્થિતો
    મામાજ્ઞાપય તન્નિરૂપય મુહુર્મામેવ મા મેઽવચઃ ॥ ૪૧॥

ગામ્ભીર્યં પરિખાપદં ઘનધૃતિઃ પ્રાકાર ઉદ્યદ્ગુણ-
    સ્તોમશ્ચાપ્તબલં ઘનેન્દ્રિયચયો દ્વારાણિ દેહે સ્થિતઃ ।
વિદ્યાવસ્તુસમૃદ્ધિરિત્યખિલસામગ્રીસમેતે સદા
    દુર્ગાતિપ્રિયદેવ મામકમનોદુર્ગે નિવાસં કુરુ ॥ ૪૨॥

મા ગચ્છ ત્વમિતસ્તતો ગિરિશ ભો મય્યેવ વાસં કુરુ
    સ્વામિન્નાદિકિરાત મામકમનઃકાન્તારસીમાન્તરે ।
વર્તન્તે બહુશો મૃગા મદજુષો માત્સર્યમોહાદય-
    સ્તાન્ હત્વા મૃગયાવિનોદરુચિતાલાભં ચ સમ્પ્રાપ્સ્યસિ ॥ ૪૩॥

કરલગ્નમૃગઃ કરીન્દ્રભઙ્ગો
    ઘનશાર્દૂલવિખણ્ડનોઽસ્તજન્તુઃ ।
ગિરિશો વિશદાકૃતિશ્ચ ચેતઃ-
    કુહરે પઞ્ચમુખોસ્તિ મે કુતો ભીઃ ॥ ૪૪॥

છન્દઃશાખિશિખાન્વિતૈર્દ્વિજવરૈઃ સંસેવિતે શાશ્વતે
    સૌખ્યાપાદિનિ ખેદભેદિનિ સુધાસારૈઃ ફલૈર્દીપિતે ।
ચેતઃપક્ષિશિખામણે ત્યજ વૃથાસઞ્ચારમન્યૈરલં
    નિત્યં શઙ્કરપાદપદ્મયુગલીનીડે વિહારં કુરુ ॥ ૪૫॥

આકીર્ણે નખરાજિકાન્તિવિભવૈરુદ્યત્સુધાવૈભવૈ-
    રાધૌતેપિ ચ પદ્મરાગલલિતે હંસવ્રજૈરાશ્રિતે ।
નિત્યં ભક્તિવધૂગણૈશ્ચ રહસિ સ્વેચ્છાવિહારં કુરુ
    સ્થિત્વા માનસરાજહંસ ગિરિજાનાથાઙ્ઘ્રિસૌધાન્તરે ॥ ૪૬॥

શમ્ભુધ્યાનવસન્તસઙ્ગિનિ હૃદારામેઽઘજીર્ણચ્છદાઃ
    સ્રસ્તા ભક્તિલતાચ્છટા વિલસિતાઃ પુણ્યપ્રવાલશ્રિતાઃ ।
દીપ્યન્તે ગુણકોરકા જપવચઃપુષ્પાણિ સદ્વાસના
    જ્ઞાનાનન્દસુધામરન્દલહરી સંવિત્ફલાભ્યુન્નતિઃ ॥ ૪૭॥

નિત્યાનન્દરસાલયં સુરમુનિસ્વાન્તામ્બુજાતાશ્રયં
    સ્વચ્છં સદ્વિજસેવિતં કલુષહૃત્સદ્વાસનાવિષ્કૃતમ્ ।
શમ્ભુધ્યાનસરોવરં વ્રજ મનો હંસાવતંસ સ્થિરં
    કિં ક્ષુદ્રાશ્રયપલ્વલભ્રમણસઞ્જાતશ્રમં પ્રાપ્સ્યસિ ॥ ૪૮॥

આનન્દામૃતપૂરિતા હરપદામ્ભોજાલવાલોદ્યતા
    સ્થૈર્યોપઘ્નમુપેત્ય ભક્તિલતિકા શાખોપશાખાન્વિતા ।
ઉચ્ચૈર્માનસકાયમાનપટલીમાક્રમ્ય નિષ્કલ્મષા
    નિત્યાભીષ્ટફલપ્રદા ભવતુ મે સત્કર્મસંવર્ધિતા ॥ ૪૯॥

સન્ધ્યારમ્ભવિજૃમ્ભિતં શ્રુતિશિરઃસ્થાનાન્તરાધિષ્ઠિતં
    સપ્રેમભ્રમરાભિરામમસકૃત્ સદ્વાસનાશોભિતમ્ ।
ભોગીન્દ્રાભરણં સમસ્તસુમનઃપૂજ્યં ગુણાવિષ્કૃતં
    સેવે શ્રીગિરિમલ્લિકાર્જુનમહાલિઙ્ગં શિવાલિઙ્ગિતમ્ ॥ ૫૦॥

ભૃઙ્ગીચ્છાનટનોત્કટઃ કરિમદગ્રાહી સ્ફુરન્માધવા-

હ્લાદો નાદયુતો મહાસિતવપુઃ પઞ્ચેષુણા ચાદૃતઃ ।
સત્પક્ષઃ સુમનોવનેષુ સ પુનઃ સાક્ષાન્મદીયે મનો-
રાજીવે ભ્રમરાધિપો વિહરતાં શ્રીશૈલવાસી વિભુઃ ॥ ૫૧॥

કારુણ્યામૃતવર્ષિણં ઘનવિપદ્-ગ્રીષ્મચ્છિદાકર્મઠં
વિદ્યાસસ્યફલોદયાય સુમનઃસંસેવ્યમિચ્છાકૃતિમ્ ।
નૃત્યદ્ભક્તમયૂરમદ્રિનિલયં ચઞ્ચજ્જટામણ્ડલં
શમ્ભો વાઞ્છતિ નીલકન્ધર સદા ત્વાં મે મનશ્ચાતકઃ ॥ ૫૨॥

આકાશેન શિખી સમસ્તફણિનાં નેત્રા કલાપી નતા-
ઽનુગ્રાહિપ્રણવોપદેશનિનદૈઃ કેકીતિ યો ગીયતે ।
શ્યામાં શૈલસમુદ્ભવાં ઘનરુચિં દૃષ્ટ્વા નટન્તં મુદા
વેદાન્તોપવને વિહારરસિકં તં નીલકણ્ઠં ભજે ॥ ૫૩॥

સન્ધ્યા ઘર્મદિનાત્યયો હરિકરાઘાતપ્રભૂતાનક-
ધ્વાનો વારિદગર્જિતં દિવિષદાં દૃષ્ટિચ્છટા ચઞ્ચલા ।
ભક્તાનાં પરિતોષબાષ્પવિતતિર્વૃષ્ટિર્મયૂરી શિવા
યસ્મિન્નુજ્જ્વલતાણ્ડવં વિજયતે તં નીલકણ્ઠં ભજે ॥ ૫૪॥

આદ્યાયામિતતેજસે શ્રુતિપદૈર્વેદ્યાય સાધ્યાય તે
વિદ્યાનન્દમયાત્મને ત્રિજગતઃ સંરક્ષણોદ્યોગિને ।
ધ્યેયાયાખિલયોગિભિઃ સુરગણૈર્ગેયાય માયાવિને
સમ્યક્તાણ્ડવસમ્ભ્રમાય જટિને સેયં નતિઃ શમ્ભવે ॥ ૫૫॥

નિત્યાય ત્રિગુણાત્મને પુરજિતે કાત્યાયનીશ્રેયસે
સત્યાયાદિકુટુમ્બિને મુનિમનઃ પ્રત્યક્ષચિન્મૂર્તયે ।
માયાસૃષ્ટજગત્ત્રયાય સકલામ્નાયાન્તસઞ્ચારિણે
સાયન્તાણ્ડવસમ્ભ્રમાય જટિને સેયં નતિઃ શમ્ભવે ॥ ૫૬॥

નિત્યં સ્વોદરપૂરણાય સકલાનુદ્દિશ્ય વિત્તાશયા (સ્વોદરપોષણાય)
વ્યર્થં પર્યટનં કરોમિ ભવતઃ સેવાં ન જાને વિભો ।
મજ્જન્માન્તરપુણ્યપાકબલતસ્ત્વં શર્વ સર્વાન્તર-
સ્તિષ્ઠસ્યેવ હિ તેન વા પશુપતે તે રક્ષણીયોઽસ્મ્યહમ્ ॥ ૫૭॥

એકો વારિજબાન્ધવઃ ક્ષિતિનભોવ્યાપ્તં તમોમણ્ડલં
ભિત્ત્વા લોચનગોચરોઽપિ ભવતિ ત્વં કોટિસૂર્યપ્રભઃ ।
વેદ્યઃ કિન્ન ભવસ્યહો ઘનતરં કીદૃગ્ભવેન્મત્તમ-

સ્તત્સર્વં વ્યપનીય મે પશુપતે સાક્ષાત્ પ્રસન્નો ભવ ॥ ૫૮॥

હંસઃ પદ્મવનં સમિચ્છતિ યથા નીલામ્બુદં ચાતકઃ
કોકઃ કોકનદપ્રિયં પ્રતિદિનં ચન્દ્રં ચકોરસ્તથા ।
ચેતો વાઞ્છતિ મામકં પશુપતે ચિન્માર્ગમૃગ્યં વિભો
ગૌરીનાથ ભવત્પદાબ્જયુગલં કૈવલ્યસૌખ્યપ્રદમ્ ॥ ૫૯॥

રોધસ્તોયહૃતઃ શ્રમેણ પથિકશ્છાયાં તરોર્વૃષ્ટિતો
ભીતઃ સ્વસ્થગૃહં ગૃહસ્થમતિથિર્દીનઃ પ્રભું ધાર્મિકમ્ ।
દીપં સન્તમસાકુલશ્ચ શિખિનં શીતાવૃતસ્ત્વં તથા
ચેતઃ સર્વભયાપહં વ્રજ સુખં શમ્ભોઃ પદામ્ભોરુહમ્ ॥ ૬૦॥

અઙ્કોલં નિજબીજસન્તતિરયસ્કાન્તોપલં સૂચિકા
સાધ્વી નૈજવિભું લતા ક્ષિતિરુહં સિન્ધુઃ સરિદ્વલ્લભમ્ ।
પ્રાપ્નોતીહ યથા તથા પશુપતેઃ પાદારવિન્દદ્વયં
ચેતોવૃત્તિરુપેત્ય તિષ્ઠતિ સદા સા ભક્તિરિત્યુચ્યતે ॥ ૬૧॥

આનન્દાશ્રુભિરાતનોતિ પુલકં નૈર્મલ્યતશ્છાદનં
વાચાશઙ્ખમુખે સ્થિતૈશ્ચ જઠરાપૂર્તિં ચરિત્રામૃતૈઃ ।
રુદ્રાક્ષૈર્ભસિતેન દેવ વપુષો રક્ષાં ભવદ્ભાવના-
પર્યઙ્કે વિનિવેશ્ય ભક્તિજનની ભક્તાર્ભકં રક્ષતિ ॥ ૬૨॥

માર્ગાવર્તિતપાદુકા પશુપતેરઙ્ગસ્ય કૂર્ચાયતે
ગણ્ડૂષામ્બુનિષેચનં પુરરિપોર્દિવ્યાભિષેકાયતે ।
કિઞ્ચિદ્ભક્ષિતમાંસશેષકબલં નવ્યોપહારાયતે
ભક્તિઃ કિં ન કરોત્યહો વનચરો ભક્તાવતંસાયતે ॥ ૬૩॥

વક્ષસ્તાડનમન્તકસ્ય કઠિનાપસ્મારસમ્મર્દનં
ભૂભૃત્પર્યટનં નમત્સુરશિરઃકોટીરસઙ્ઘર્ષણમ્ ।
કર્મેદં મૃદુલસ્ય તાવકપદદ્વન્દ્વસ્ય કિં વોચિતં
મચ્ચેતોમણિપાદુકાવિહરણં શમ્ભો સદાઙ્ગીકુરુ ॥ ૬૪॥

વક્ષસ્તાડનશઙ્કયા વિચલિતો વૈવસ્વતો નિર્જરાઃ
કોટીરોજ્જ્વલરત્નદીપકલિકાનીરાજનં કુર્વતે ।
દૃષ્ટ્વા મુક્તિવધૂસ્તનોતિ નિભૃતાશ્લેષં ભવાનીપતે
યચ્ચેતસ્તવ પાદપદ્મભજનં તસ્યેહ કિં દુર્લભમ્ ॥ ૬૫॥

ક્રીડાર્થં સૃજસિ પ્રપઞ્ચમખિલં ક્રીડામૃગાસ્તે જના
    યત્કર્માચરિતં મયા ચ ભવતઃ પ્રીત્યૈ ભવત્યેવ તત્ ।
શમ્ભો સ્વસ્ય કુતૂહલસ્ય કરણં મચ્ચેષ્ટિતં નિશ્ચિતં
    તસ્માન્મામકરક્ષણં પશુપતે કર્તવ્યમેવ ત્વયા ॥ ૬૬॥

બહુવિધપરિતોષબાષ્પપૂર-
    સ્ફુટપુલકાઙ્કિતચારુભોગભૂમિમ્ ।
ચિરપદફલકાઙ્ક્ષિસેવ્યમાનાં
    પરમસદાશિવભાવનાં પ્રપદ્યે ॥ ૬૭॥

અમિતમુદમૃતં મુહુર્દુહન્તીં
    વિમલભવત્પદગોષ્ઠમાવસન્તીમ્ ।
સદય પશુપતે સુપુણ્યપાકાં
    મમ પરિપાલય ભક્તિધેનુમેકામ્ ॥ ૬૮॥

જડતા પશુતા કલઙ્કિતા
    કુટિલચરત્વં ચ નાસ્તિ મયિ દેવ ।
અસ્તિ યદિ રાજમૌલે
    ભવદાભરણસ્ય નાસ્મિ કિં પાત્રમ્ ॥ ૬૯॥

અરહસિ રહસિ સ્વતન્ત્રબુદ્ધ્યા
    વરિવસિતું સુલભઃ પ્રસન્નમૂર્તિઃ ।
અગણિતફલદાયકઃ પ્રભુર્મે
    જગદધિકો હૃદિ રાજશેખરોઽસ્તિ ॥ ૭૦॥

આરૂઢભક્તિગુણકુઞ્ચિતભાવચાપ-
    યુક્તૈઃ શિવસ્મરણબાણગણૈરમોઘૈઃ ।
નિર્જિત્ય કિલ્બિષરિપૂન્ વિજયી સુધીન્દ્રઃ
    સાનન્દમાવહતિ સુસ્થિરરાજલક્ષ્મીમ્ ॥ ૭૧॥

ધ્યાનાઞ્જનેન સમવેક્ષ્ય તમઃપ્રદેશં
    ભિત્ત્વા મહાબલિભિરીશ્વરનામમન્ત્રૈઃ ।
દિવ્યાશ્રિતં ભુજગભૂષણમુદ્વહન્તિ
    યે પાદપદ્મમિહ તે શિવ તે કૃતાર્થાઃ ॥ ૭૨॥

ભૂદારતામુદવહદ્યદપેક્ષયા શ્રી-
    ભૂદાર એવ કિમતઃ સુમતે લભસ્વ ।

કેદારમાકલિતમુક્તિમહૌષધીનાં
    પાદારવિન્દભજનં પરમેશ્વરસ્ય ॥ ૭૩॥

આશાપાશક્લેશદુર્વાસનાદિ-
    ભેદોદ્યુક્તૈર્દિવ્યગન્ધૈરમન્દૈઃ ।
આશાશાટીકસ્ય પાદારવિન્દં
    ચેતઃપેટીં વાસિતાં મે તનોતુ ॥ ૭૪॥

કલ્યાણિનં સરસચિત્રગતિં સવેગં
    સર્વેઙ્ગિતજ્ઞમનઘં ધ્રુવલક્ષણાઢ્યમ્ ।
ચેતસ્તુરઙ્ગમધિરુહ્ય ચર સ્મરારે
    નેતઃ સમસ્તજગતાં વૃષભાધિરૂઢ ॥ ૭૫॥

ભક્તિર્મહેશપદપુષ્કરમાવસન્તી
    કાદમ્બિનીવ કુરુતે પરિતોષવર્ષમ્ ।
સમ્પૂરિતો ભવતિ યસ્ય મનસ્તટાક-
    સ્તજ્જન્મસસ્યમખિલં સફલં ચ નાઽન્યત્ ॥ ૭૬॥

બુદ્ધિઃ સ્થિરા ભવિતુમીશ્વરપાદપદ્મ-
    સક્તા વધૂર્વિરહિણીવ સદા સ્મરન્તી ।
સદ્ભાવનાસ્મરણદર્શનકીર્તનાદિ
    સમ્મોહિતેવ શિવમન્ત્રજપેન વિન્તે ॥ ૭૭॥

સદુપચારવિધિષ્વનુબોધિતાં
    સવિનયાં સુહૃદં સમુપાશ્રિતામ્ ।
મમ સમુદ્ધર બુદ્ધિમિમાં પ્રભો
    વરગુણેન નવોઢવધૂમિવ ॥ ૭૮॥

નિત્યં યોગિમનઃ સરોજદલસઞ્ચારક્ષમસ્ત્વત્ક્રમઃ
    શમ્ભો તેન કથં કઠોરયમરાડ્વક્ષઃકવાટક્ષતિઃ ।
અત્યન્તં મૃદુલં ત્વદઙ્ઘ્રિયુગલં હા મે મનશ્ચિન્તય-
    ત્યેતલ્લોચનગોચરં કુરુ વિભો હસ્તેન સંવાહયે ॥ ૭૯॥

એષ્યત્યેષ જનિં મનોઽસ્ય કઠિનં તસ્મિન્નટાનીતિ મ-
    દ્રક્ષાયૈ ગિરિસીમ્નિ કોમલપદન્યાસઃ પુરાભ્યાસિતઃ ।
નો ચેદ્દિવ્યગૃહાન્તરેષુ સુમનસ્તલ્પેષુ વેદ્યાદિષુ
    પ્રાયઃ સત્સુ શિલાતલેષુ નટનં શમ્ભો કિમર્થં તવ ॥ ૮૦॥

કશ્ચિત્કાલમુમામહેશ ભવતઃ પાદારવિન્દાર્ચનૈઃ
    કશ્ચિદ્ધ્યાનસમાધિભિશ્ચ નતિભિઃ કશ્ચિત્કથાકર્ણનૈઃ ।
કશ્ચિત્ કશ્ચિદવેક્ષણૈશ્ચ નુતિભિઃ કશ્ચિદ્દશામીદૃશીં
    યઃ પ્રાપ્નોતિ મુદા ત્વદર્પિતમના જીવન્ સ મુક્તઃ ખલુ ॥ ૮૧॥

બાણત્વં વૃષભત્વમર્ધવપુષા ભાર્યાત્વમાર્યાપતે
    ઘોણિત્વં સખિતા મૃદઙ્ગવહતા ચેત્યાદિ રૂપં દધૌ ।
ત્વત્પાદે નયનાર્પણં ચ કૃતવાન્ ત્વદ્દેહભાગો હરિઃ
    પૂજ્યાત્પૂજ્યતરઃ સ એવ હિ ન ચેત્ કો વા તદન્યોઽધિકઃ ॥ ૮૨॥

જનનમૃતિયુતાનાં સેવયા દેવતાનાં
    ન ભવતિ સુખલેશઃ સંશયો નાસ્તિ તત્ર ।
અજનિમમૃતરૂપં સામ્બમીશં ભજન્તે
    ય ઇહ પરમસૌખ્યં તે હિ ધન્યા લભન્તે ॥ ૮૩॥

શિવ તવ પરિચર્યાસન્નિધાનાય ગૌર્યા
    ભવ મમ ગુણધુર્યાં બુદ્ધિકન્યાં પ્રદાસ્યે ।
સકલભુવનબન્ધો સચ્ચિદાનન્દસિન્ધો
    સદય હૃદયગેહે સર્વદા સંવસ ત્વમ્ ॥ ૮૪॥

જલધિમથનદક્ષો નૈવ પાતાલભેદી
    ન ચ વનમૃગયાયાં નૈવ લુબ્ધઃ પ્રવીણઃ ।
અશનકુસુમભૂષાવસ્ત્રમુખ્યાં સપર્યાં
    કથય કથમહં તે કલ્પયાનીન્દુમૌલે ॥ ૮૫॥

પૂજાદ્રવ્યસમૃદ્ધયો વિરચિતાઃ પૂજાં કથં કુર્મહે
    પક્ષિત્વં ન ચ વા કિટિત્વમપિ ન પ્રાપ્તં મયા દુર્લભમ્ ।
જાને મસ્તકમઙ્ઘ્રિપલ્લવમુમાજાને ન તેઽહં વિભો
    ન જ્ઞાતં હિ પિતામહેન હરિણા તત્ત્વેન તદ્રૂપિણા ॥ ૮૬॥

અશનં ગરલં ફણી કલાપો
    વસનં ચર્મ ચ વાહનં મહોક્ષઃ ।
મમ દાસ્યસિ કિં કિમસ્તિ શમ્ભો
    તવ પાદામ્બુજભક્તિમેવ દેહિ ॥ ૮૭॥

યદા કૃતામ્ભોનિધિસેતુબન્ધનઃ

કરસ્થલાધઃકૃતપર્વતાધિપઃ ।
ભવાનિ તે લઙ્ઘિતપદ્મસમ્ભવઃ
તદા શિવાર્ચાસ્તવભાવનક્ષમઃ ॥ ૮૮॥

નતિભિર્નુતિભિસ્ત્વમીશ પૂજા-
વિધિભિર્ધ્યાનસમાધિભિર્ન તુષ્ટઃ ।
ધનુષા મુસલેન ચાશ્મભિર્વા
વદ તે પ્રીતિકરં તથા કરોમિ ॥ ૮૯॥

વચસા ચરિતં વદામિ શમ્ભો-
રહમુદ્યોગવિધાસુ તેઽપ્રસક્તઃ ।
મનસાકૃતિમીશ્વરસ્ય સેવે
શિરસા ચૈવ સદાશિવં નમામિ ॥ ૯૦॥

આદ્યાઽવિદ્યા હૃદ્ગતા નિર્ગતાસી-
દ્વિદ્યા હૃદ્યા હૃદ્ગતા ત્વત્પ્રસાદાત્ ।
સેવે નિત્યં શ્રીકરં ત્વત્પદાબ્જં
ભાવે મુક્તેર્ભાજનં રાજમૌલે ॥ ૯૧॥

દૂરીકૃતાનિ દુરિતાનિ દુરક્ષરાણિ
દૌર્ભાગ્યદુઃખદુરહઙ્કૃતિદુર્વચાંસિ ।
સારં ત્વદીયચરિતં નિતરાં પિબન્તં
ગૌરીશ મામિહ સમુદ્ધર સત્કટાક્ષૈઃ ॥ ૯૨॥

સોમકલાધરમૌલૌ
કોમલઘનકન્ધરે મહામહસિ ।
સ્વામિનિ ગિરિજાનાથે
મામકહૃદયં નિરન્તરં રમતામ્ ॥ ૯૩॥

સા રસના તે નયને
તાવેવ કરૌ સ એવ કૃતકૃત્યઃ ।
યા યે યૌ યો ભર્ગં
વદતીક્ષેતે સદાર્ચતઃ સ્મરતિ ॥ ૯૪॥

અતિમૃદુલૌ મમ ચરણા-
વતિકઠિનં તે મનો ભવાનીશ ।
ઇતિ વિચિકિત્સાં સન્ત્યજ

શિવ કથમાસીદ્ગિરૌ તથા વેશઃ (વેશ્મઃ) ॥ ૯૫॥

ધૈર્યાઙ્કુશેન નિભૃતં
રભસાદાકૃષ્ય ભક્તિશ‍ૃઙ્ખલયા ।
પુરહર ચરણાલાને
હૃદયમદેભં બધાન ચિદ્યન્ત્રૈઃ ॥ ૯૬॥

પ્રચરત્યભિતઃ પ્રગલ્ભવૃત્ત્યા
મદવાનેષ મનઃકરી ગરીયાન્ ।
પરિગૃહ્ય નયેન ભક્તિરજ્જ્વા
પરમ સ્થાણુપદં દૃઢં નયામુમ્ ॥ ૯૭॥

સર્વાલઙ્કારયુક્તાં સરલપદયુતાં સાધુવૃત્તાં સુવર્ણાં
સદ્ભિઃ સંસ્તૂયમાનાં સરસગુણયુતાં લક્ષિતાં લક્ષણાઢ્યામ્ ।
ઉદ્યદ્ભૂષાવિશેષામુપગતવિનયાં દ્યોતમાનાર્થરેખાં
કલ્યાણીં દેવ ગૌરીપ્રિય મમ કવિતાકન્યકાં ત્વં ગૃહાણ ॥ ૯૮॥

ઇદં તે યુક્તં વા પરમશિવ કારુણ્યજલધે
ગતૌ તિર્યગ્રૂપં તવ પદશિરોદર્શનધિયા ।
હરિબ્રહ્માણૌ તૌ દિવિ ભુવિ ચરન્તૌ શ્રમયુતૌ
કથં શમ્ભો સ્વામિન્ કથય મમ વેદ્યોઽસિ પુરતઃ ॥ ૯૯॥

સ્તોત્રેણાલમહં પ્રવચ્મિ ન મૃષા દેવા વિરિઞ્ચાદયઃ
સ્તુત્યાનાં ગણનાપ્રસઙ્ગસમયે ત્વામગ્રગણ્યં વિદુઃ ।
માહાત્મ્યાગ્રવિચારણપ્રકરણે ધાનાતુષસ્તોમવ-
દ્ધૂતાસ્ત્વાં વિદુરુત્તમોત્તમફલં શમ્ભો ભવત્સેવકાઃ ॥ ૧૦૦॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિત શિવાનન્દલહરી સમાપ્તા ॥

॥ ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિત શિવાનન્દલહરી સમાપ્તા ॥

Encoded by P. P. Narayanaswami at swami at math.mun.ca
Proofread by P. P. Narayanaswami, Rajesh Thyagarajan, Kavitha, Rajani Arjun Shankar

*Shivananda LaharI*

pdf was typeset on June 16, 2023

Please send corrections to *sanskrit@cheerful.com*